Shri Raghunath Temple MSS. Library,
JAMMU

No. ४३४५

Title शास्त्र दीपिका ११ पाद्यावत्:

Author पार्थ सारथि मिश्रः

Extent ३१ Age ४

Subject पू. मीमांसाशास्त्रं

शास्त्रदीपिकैकादशाध्यायः

४२४५

मर

॥प्रयोजनाभिसंबंधात्पृथक्त्वं ततः स्यादेककर्म्यमेकशब्दाभिसंयोगात्॥

दशमे प्रायेणबाधाभ्युच्चयचिंतया विकृतिषु गपरिमाणं चिंतितं अतिदेशविचारस्य तद
मादि निर्दिश्य पर्यंते: समाप्तः सप्रत्युपदेशादिति देशसाधारणेन प्रयोगपरिमाणे परिमाणप्र
संगादेकादशे तंत्रावापचिंतया चिंत्यते। उपदिष्टातिदिष्टपदार्थफलावधारणाधीनं च प्रयोगे
फलावधारणमिति तदुत्तरकालमारंभः॥ तदिह कप्रयोगवचनचोदितानामिकफलानां सह
स्यकारित्वं बहूनीकर्मणी साधारणांगभाजां मेयानुष्ठाने किं तंत्रेणानुष्ठातव्यमुतावृत्त्येति चिंताल
क्षणार्थः॥ प्रथमेताबदुपोद्घाततवेन सहत्यकारित्वं प्रतिपाद्यते यदि त्वाग्नेयादयः षडपि परस्प
रानपेक्षाः स्वर्गं साधयेयुः ततस्तेषां कामिनः कर्त्तव्यत्वेन युगपदुपस्थानाभावात्पृथक्प्र
योगवाक्यैर्गायुक्ताः कर्त्तव्या इति न तंत्रत्वेसिद्धेस्तत्रत्य सहत्यकारित्वं प्रतिपाद्यते तदयम
त्राधिकरणे विचारः॥ किमाग्नेयादीनि पृथक्पृथक्स्वर्गं साधयंति उत संहत्येति। तत्
त्र ॥ परस्परानपेक्षाणामुत्पन्नानां फलाकांक्षिणी। बोधमानं फलं तेषामेकैकस्याव्यधार्य
ते। तेषां चिदि समानत्वे साहित्यं न विवक्षितं तस्मात्प्रत्येकमेव स्यादिति प्राप्ते विधीयते॥

कप्रतीकमुतसंहत्यैति विचारो नानार्थेति। स्वर्गकामाधिकरणेन स्वर्गस्य तत्कामनायाश्चांगत्वेन विधानं निराकृतमितमुन
श्रौतानांतुशब्दे। क्रतुवत्स्यात्फलान्यत्वं॥ अतः प्रभृति षड्भिः सूत्रैः कर्माधिकरणं। एकैकतापिसमाप्तैः स्यात् प्रधानवत्त्वजिः सूत्रैरधिक

१ ग्नेयादिकमुद्दिश्य फलं यद्यपदिश्यते॥ ततस्तु उद्दिश्यमानत्वात्तेषामेकैकतः फलं। कामिने
तु यदा दिश्यकर्मणां चोदना तदा तेषां विधीयमानानां सहभावो विवक्षितः॥ यद्यपि चोभयथा
वचनव्यक्तिः संभवति। तथापि तुल्यावगतौ दर्शशब्देन त्रिकस्य पूर्णमासशब्देन त्रिकस्यैव चाभि
धानावगतेः च साहित्यप्रतीतिबाधात् कामिनमेवोपादाय त्रीन्नरमुद्दिश्याग्नेयादीनि विधी
यंत इत्येतदेव युक्तं॥ प्रधानत्वाच्च फलस्यैवोद्देशो युक्तो न कर्मणां गुणभूतानां। एकस्मि
न्नपि फले साहित्यकारित्वेन विनियुक्तानां प्रत्येकमभ्युत्पन्नानां फलापेक्षाणि वर्त्तत इति
नानपेक्षितसंबंधापत्तिः तस्मात्फलोद्देशेन विधीयमानानां विवक्षितं साहित्यमिति
सिद्धं साहित्यकारित्वे॥ यत्तु भाष्यकारेण पुरुषपरत्वे कालपरत्वे निमित्तपरत्वे चानेक
कृत्यफलपरत्वे कामपदस्य समाप्तिः। तदिहाप्यत्र चिंतमपि विचारः। यथोद्धृतत्वेन
सतितस्य फलपरत्वे विकल्पसमुच्चयविचार इति वेद्यं। तथापि नास्त्येव प्रयोजनं करणकल्प
स्थितसामर्थ्याद्बोधनरूपस्योपकारस्य स्पष्टमेवैकत्वं। अत्रैव तत् कार्यैत्वैरेकस्य सिद्धौ तथापि

वक्तो। चेदस्ति कार्याणां कारकत्वं तदानां समुच्चयः। कार्यैकत्वे ... विधानान्यसमुच्चयइति नास्त्यनुष्ठाने विशेषः। उपोद्घात
कर्मदं सतिहि कार्यैकत्वे ४२ सूक्ति ३

सेमतएवेति न चिंतनीयं पक्षपा मः॥ अपवगानन्तर्बोधनस्या वीतरकार्याणामभावं किंतु
पकाराख्यं वस्तु मन्यते तदप्रमाणात् निष्प्रयोजनेव अनन्तर्बोधन एव विकल्पसमुच्चयप्रति
न्नोपपत्तेः। तस्मादेकमेवैवैपेनवदत्त्वासूत्रे समुच्चयप्रतिपादनार्थमधिकरणं। अयम्भाव
पक्षः। ये मेगानामितरेतरनिरपेक्षाणामेकत्रोपकारकतया विकल्पउते केन द्वाभ्यां व कृति
श्लोपकारसिद्धिरूपकार्यस्यायावफल भूयस्त्वे गुतसमुच्चिता नामेवोपकारकत्वमि
ति। तदर्थमिदं विचार्यते॥ किमेगानीत्यात्मीये विधिलिः प्रयोगो विधीयते किं वाप्र
धानविधिनेति। तत्र प्रधानान्यैके। नशब्दे नतैत्रैणामिहितानि युगपत्फले विनियु
क्तानि न पृ केयत्फले समुच्चीयते अंगानि कृष्टपूरुषश्चोत्तिहितानि पृथगेव वि
हितानि फलमपेक्षमाणानपन्योन्यानिरपेक्षाणां वक्त्रे पकारोपर्तयाविनियुक्ता
नि विकल्पितुमर्हति। तेषां हि स्ववाक्यै रेव विधाने अस्मति विधानै गत्वानुपपत्तेः। उक्तं
हि। न वा विहितमंगं भवतीति। स्ववाक्यानि च तेषामेकैकमेव विदधतानि कुतः स

मुच्चयः। न हि कश्चिच्छ्रोत्रियो नैषां सहितानामनुष्ठानमुच्यते। तस्माद्यथासत्यपि
पशुफलत्वे चित्रोद्भिदादीनां प्रत्येकविधानादसमुच्चयस्तथाङ्गानामपीति प्रथमः पक्षः।
२ सत्यं निरपेक्षाणामुपकारकत्वं गम्यते तथापि बहूनामङ्गानां सामर्थ्याद्विकल्पस्यान्या-
य्यत्वात्तेषामेकमपि प्रयुञ्जीत तथा द्वे बहूनि वा। अङ्गभूयस्त्वाद्वोपकारभूयस्त्वात्फ-
लभूयस्त्वमिति द्वितीयः। सर्वैकेनापि समाप्ते तल्पनेन सूत्रेणोच्यते। पक्षान्तरमेव
चाधिकरणान्तरमिव नाशङ्कनीयमिति। अधिकरणान्तरत्वे त्वनेनैव सूत्रेण विकल्पपक्षो
वक्तव्यः स्यात्। न चानेन विकल्प उच्यते प्राप्ते पुनरेवं स्यादिति समुच्चयस्यापनु-
त्तानात् तस्मान्नाधिकरणान्तरमिति। ईतस्तु युक्तं चित्रादीनां नैरपेक्ष्यं तत्र हि प्रतिवाक्यं
नेदं नकामपदं श्रूयते। समिदादिषु तु यद्यपि प्रतिवाक्यं विधिश्रवणात्फलापेक्षोपजा- २
यते तत्र तु न प्रतिवाक्यं श्रूयते प्रधानभावनयाखेषां फलाकाङ्क्षिणां कथंभावापेक्षा
सहैत्यैकभावेन संबन्धः। सा च समस्तोपात्तासर्वेरङ्गैरुच्यमाणा विशेषे विधि श्रायुगपत्

धानविधिनाविधीयतइतिसिद्धः समुच्चयश्च यपिचप्रत्येकं विधिः श्रूयते तथाप्येकत्र
यालाभादसाधुदासैः तावी शास्त्रविध्यवगमबलादेव पुरुषार्थरूपोपेद्यते तावा
नवचतत्रविवेरूपयोगः। तदभावेधात्वर्थ एवभाव्यो भवेदिति पतेत्। सत्यां च फलापेक्षा
यांप्रकृतिभावनया युगपत्संबंधात्तस्याश्च सर्वांगाविशिष्टाया युगपत्प्रधानविधि
नाविधानादंगानामपि ततएवानुष्ठानसिद्धेः स्वस्मिन्नंशे अंगविधीनामनुवादकत्वं
त्वे॥ सर्वविशिष्टविधानाच्च समुच्चयः॥ ॥कर्म्मण्यपारेन भाव्यत्वाच्चूषिकस्वत्पारेने
फलानिस्युः॥ काम्यानां च कर्मणामेह्रीगत्सो यदानीं किं सकृदेवप्रयोगस्तत भूयो
यः फलमिच्छतो भूयोपि प्रयोग इति संदेहे सकृदिति ब्रूमः। कर्मणा हि फलेकालीतं
रेजनयितव्यं। तद्द्वारमपेक्षते। तत्रात्मनो दृष्टमपूर्वं तस्य च कर्मजन्यत्वे फलहेतु
त्वं स्यादपि त्वेवमनेककल्पनाद्वरं कृतयागादात्मनः फलमिति कल्प्यते। आत्मनो हि
सद्भावः स्थिरत्वं कर्मस्वैव धर्म्यस्य स्थूलं केवलेतु फलहेतुत्वं कल्पनीयं॥ अतः कृतयागो

दात्मनः फली। सकृत्प्रयोगादेवनासौ कृतयागो जातः पुनरपि प्रयुञ्जानस्य तस्य तावत्येव कृतयागा
३ तानर्थस्याः कश्चिदतिशाय इति अनर्थकं पुनः प्रयोगः सकृदेवनु प्रयोग इति प्राप्ते ब्रूमः। स्यात्म
न्यतिशायः कश्चित्कृतकर्मणि नैवं वेद। प्रागवस्थासमानत्वादात्मनो न केवलं ली। आत्मस्य
रूप हेतुश्च कर्तुरपि तद्वत्। तस्मादतिशायः कश्चित्कर्मभ्यो जायते नरे। स च कर्मवि
रोधित्वास्य फलाप्तेर्विनश्यति। फलीतरार्थं कर्त्तव्यं तस्मादतिशायो तरो। स एवातिशायोऽस्मा
त्तिर एवमिति गीयते। तस्माद्भूयः प्रयोक्तव्यं भूयः फलमनाप्तता। कर्मभ्यः फलसिद्धिप्रका
र विकल्पसमुच्चयरूपे चिन्तिते बहुफलसिद्धिप्रकारः सकृदसकृद्रूपः चिन्तित इति सङ्ग ३
तिः॥ ॥क्रियाणामर्थशेषत्वात्प्रत्यक्षेतन्निवृत्त्यापवर्गः स्यात्॥ दर्शपूर्णमासयोः श्रूय
ते व्रीहीनवहन्तीति। तत्र संशयः किं सकृदेवावघातं निष्पन्नेऽपि कर्त्तव्यो परं तव्य उत यावत्तण्डुलनि
ष्पत्ति प्रयोक्तव्यमिति। तत्रोच्यते अवहनननिपतनमात्रस्य शब्दार्थत्वात्तन्मात्रं विधीयते। विहितस्य च प्र
योजनकल्पनामित्यपसृप्य दृष्टे अवघातमात्रमदृष्टार्थं कर्त्तव्यं। स यौष्माव हन्तिवत्स्यादवं

यद्यवघातं कुर्यादिति विधीयते अवघातेन तुषसमाहितं कुर्यादिति विधिः समीहिते वह्दृष्टस-
नवतिनादृष्टं कल्पयितव्यं। संभवति वेह कल्पप्रक्षिते तंदुलनिर्वृत्तिपर्यंतावघातस्यैतित
दं वप्रयोजनं। तत्र नाभ्यासो नाशकामिति प्रयोजनवशाद्भ्रूतोप्यभ्यासः कर्तव्यः स एवौ
षधावघाते तु दृष्टार्थे तवादृष्टार्थे त्वाद्दृष्टार्थमात्रैकत्वं मे। सकृदसकृद्विवारप्रसंगा
संगतिः एवमुत्तरत्रापि॥ ॥ क्रतुवद्वानुमानेनाभ्यासे फलभूमा स्यात्॥ ॥फलभू
मार्थिनां कर्माणि पुनः प्रयोक्तव्यानीति स्थिते चिंत्यते॥ किमकस्मिन्प्रयोगे गानि पुनः
प्रयुंजानस्य फलभूयस्त्वं भवति नेति। तत्राभ्यस्यमानान्यंगानि बहून्युपकारान् जनं
यंति बहूपकारयुतं च प्रधानं फलभूयस्त्वाय भवतीति मन्वानस्योत्तरं। समग्रका
रणाद्युत्पाहि कार्यमावर्त्तितोप्रधानैवसांगे फलसामग्र्यां नीगमात्रे श्रुतस्याभ्यासात्रा द्दृत्प
न भूयः फललाभः। नयोपकारभूयस्त्वाया फलभूयस्त्वे प्रमाणाभावात्। न चात्रांगाभ्यासः

नर तं:

शास्त्रीयः। न चाथ्वा स्त्रीयेण प्रयासगौरवेण फलभूमा शक्यते कल्पयितुं। अत्र फलभूमा
र्पि नासौ गौप्रधान मन्यसितव्यो नीगमात्रेनापि प्रधानेमात्रे॥ ॥ बहुवचने सर्वप्राप्तो विकल्पः
ब्रह्मपे पेर ४ स्यात्॥ ॥ वसन्ताय कपिंजलानालभेत इत्यादिषु बहुवचनेषु त्रित्वपरिणामेबाले ... उत
त्रित्व प्रवृत्तिनानात्मे स्त्रयानामितिमीदृहो। बहुवचनस्य सर्वत्र वृत्तेः सर्वसंख्यानीं शास्त्रा
र्थे त्वे। शास्त्रीयार्थप्रयासगौरवात् फलभूयस्त्वम् विवादे अतो यावदुक्ता हेनानासंख्यापा
दानेनैतदेवं बहुत्वमात्रे हि शास्त्रार्थो। न तु षड्या द्वादशादयेत्यादि बहुसंख्या विशेषणीन
देन शास्त्रमस्तीय दूलात् फलभूयस्त्वं कल्प्यते। या हि त्री नालभेत पश्चसहस्रे तयोरु
नयोरपि बहुत्वसंपादनमविशिष्टं। यत्तु विशिष्यते सहस्रादिलक्षणं शास्त्रीयं। नवा ४
शास्त्रीय गौरवे फलभूयस्त्वं कल्पयितुमर्हति। एवं वसन्ते न नालभ्य बहूनामालंभनासंभ
वादवश्यं त्रयःशालभ्याः तावता बहुत्व सिद्धेः शास्त्रार्थे नाधिकालंभे तावद्धास्त्रं कल्पयति।
निवृत्तव्यापारे चविधौ न हि स्यादिति निषेधशास्त्रं प्रवर्त्तत इत्यधिकानालंभः॥ ॥ उत्तरा

सुतु याव स्यमध्यर्वत्वात्॥१॥ सान्नाय्यदोहाधिकारे श्रूयते॥ वाग्यतस्तिस्रो दोहयित्वा वि
सृज्य वाग्यमनं त्वारस्य तत्र ह्युत्तरा दोहयतीति तत्र किमुत्तरासां तिसृणामेव दोह उत याव
त्यो यजमानस्य गावस्तासां सर्वासामिति संदेहः। पूर्वपक्षे तिसृणामेव।नवयावद्दोहनी
सास्तास्त्वकेन विरविहितैये न सर्वासां दोहनं स्यात्येन च तेरा दोहयतीत्यनुवादः स्या
त्।अतो विधिरेवायमिति तिसृणामेव दोहः॥ मैवं।नास्यैतां रात्रिं कुमाराश्चिपिपयाल्प
नेरन्नितिमनेन वचनेन कृत्स्नस्य पयसो हविष्ट्ववचनात् प्राग्वापेवसर्वासां दोहने।न हि
दं कुमाराणां पयःप्रदानप्रतिषेधपरमेव प्राप्यत्वप्रसंगादपि श्राद्धनर्थत्वाद्ध।तस्मात्सर्वा
सीदोहः॥ प्रधानकर्मा चादेगानीतकर्मतैतदः प्रयोगः स्यात्॥ उपोद्घातप्रसक्तानुप्रसक्ता
दिगतेदुदानीं लक्षणार्थं तत्रावापे विचारयामः। दर्शपूर्णमासयोः षट्प्रधानकर्माणि। त्री
णि पौर्णमास्यां त्रीण्यमावास्यायां कर्तव्यानि। तत्र देशकालकर्तृणां तंत्रत्वमेव दृश्यते तेनैकप्रा

र्थ३

मेवयोर्मास्योः एकस्मिन्नेवदेशे तैवकर्त्तृत्विस्त्वाप्प्पागैयादीनितद्देशानिवकर्त्तव्याना
तिस्थिते त्रित्यते किंवयाएणाम पिप्रधानानीत्रेदेन प्रयाजाद्यैगानिकर्त्तव्यानि उतसहृदे
५ वेति। तत्रत्रेदेन विनियुक्तत्वात्त्रेदेनेवक्रियात्तवेत्॥ कथीत्रावस्यात्तिन्नत्वाद्वेदेनविनि
योगाद्यी॥ षडप्पाग्रेयादि त्रावनोः साध्यसाधनीशायुक्तात्तत्पत्तिप्रयोगवाक्यात्त्यामवगतेः
परस्परानपेक्षा एवकथमिति। स्येत्रावेत्रेदेनेवापेक्षीतो तद्वद्यास्त्विष्विसमाम्नातान्यं
गानिप्रत्येकमेवतास्तुविनियोज्येते विनियोगानुसारेणवानुष्ठानेतस्मादेकैकस्योगस्यु
क्तेकर्त्तव्यमितिचेत् सोगीकृत्याऽप्रपरमप्येतद्देव कर्त्तव्यमितिप्रोत्तानेधीयते। सत्येप्रत्ये ५
कमंगानांविनियोगास्तापापिऋविधानवदनुष्ठाने सहृदेवोपकारकं। यथैवाहिषष्टु
त्रावनासुत्रीणाविनिष्ठास्तुविधिसिता सुसाध्यसाधनीशाप्र [illegible] तिपादनेनप्रकृत्या
स्तुत्त्वीयमेत्रीकथीत्रावेत्रेदेनेवापदर्शास्वपिकहृदाम्नातापदीगाविधिष्टषष्ठीप्रत्येकमंगा
के

ति

निसमर्पयंति। सत्यपि वकस्य विहप्रधानोत्पत्तिविधिसंनिधौ प्रकरणवशेन सन्निधि
र्बाध्येत तथैव संहतानां प्रधानानां फलसाधनत्वाच्च एकदेशकालकर्तृकत्वाद्युगपत्सर्वेषामनुष्ठा
नुप्रवृत्तेषु प्रारब्धेषु सत्सु तत्कृतमेवांगी सन्निधिविकार्षे याकृतत्वात्संतमपि वेकन विशेनिधि
बाधित्वानुष्ठानक्रियाप्रारंभात्प्रकरणवशेन सन्निधौ भवतीति न ह्युनः क्रियायोः प्रयो
जनमस्ति किंच पौर्णमास्यां पौर्णमास्यां यजेतेति युगपदनुष्ठानं सर्वार्थं भवतीति नत
न्त्राणामवजातेष्वपकृष्टपक्रस्वांगयन्तुष्टीयमाने बाध्येत। तस्मादेकदेशकालकर्तृणां
तंत्रमेगानीसिद्धंति ॥ ॥व्याख्याते तुल्यकालानां यौगपद्यमंगत्वप्रमाणविशेषाणां ॥ ॥
काम्यपशुआदे प्राग्नेयं कृष्णग्रीवमालभेत सोम्यं बभ्रुं आग्नेयं कृष्णग्रीवमिति श्रुतौ। तत्राग्नेययोरनु पुरोधायामस्य ऐमानदात
ष्ठानं तंत्रेप्रयोगिति संशये तंत्रमिति ब्रूमः। भवति हि तंत्रेणानुष्ठाने दैवतैक्यात् ॥ न च पाठक्र
मात्क्रमेणानुष्ठानं। अपवर्गाभावा विहितक्रमे पाठान्नियमः संभवति यह सद्वदनुष्ठानमिति न क्र

नि

शास्त्रदी

मापेक्षात्तस्मात्तंत्रं॥ नैवं यद्यप्याग्नेययोः स्वीकृतासंभावेत तथापि सौम्येन तावद्द्रव्यरूपेणावैकृ
मः॥ तत्र पाठवशादेकस्याग्नेयस्य सौम्यात्पूर्वमनुष्ठाने इतरस्य ततः पश्चादाह सहानुष्ठाने वर्त्मरूपे
६ णावन्यतरस्य सौम्येनयः क्रमः स वाध्येत तस्मात्पृथगेवानुष्ठाने॥ ८॥ इति श्रीपार्थसार
थिमिश्रविरचितायां मेकादशस्य प्रथमः पादः॥ ७॥ एकदेशकालकर्तृत्वं मुख्यानामेकशब्दो
पदेशात्स्यात्॥ ८॥ दर्शपूर्णमासयोः देशः समे दर्शपूर्णमासाभ्यां यजेतेति कालः पौर्णमास्यां पौ
र्णमास्यां यजेतामावास्यायाममावास्यया यजेतेति। कर्तारः दर्शपौर्णमासयोश्चत्वार
ऋत्विज इति॥ किमेते देशकालकर्तारः स्तोत्रमुत्पन्ने देने इति किं यस्मिन्नेव समये स्वकर्तरि
यस्यामेव पौर्णमास्यामाग्नेयस्तस्मिन्नेव समे तस्यामेव पौर्णमास्यां तैरेव कर्तृभि ६
रग्नीषोमीय उत समानेऽपि पौर्णमासीतरकर्त्रन्तरेऽपीति तदर्थमिदं विचार्यते। किमुत्पत्तिवाक्यो
दिताग्नेयाष्टाकपालादि निर्देशादिविधानीसे बंधः। उत फलवाक्येन दर्शपूर्णमासाभ्यां स्वर्ग
कामो यजेतेति। तत्र कर्मरूपपर्यालोचने देशादीनां फलस्य वा उत्पत्तिविधिनैवातः सर्वेषामक

संबंधवद्दर्शादि

वाक्यता॥ ॥ त्रयाणामपि चोदनानां भावनयैव संबंधो दर्शादीनां फलस्यानुपात्तत्वेविधि
त्वेनान्वयो न परस्परं अतो दर्शादिविधीनां फलवाक्यस्य च न मिथः संबंधः किंतु फलवा
क्ये दर्शादिवाक्यानि वस्तुवर्त्तीनि भावनोत्पत्तिवाक्येन संबध्यंते उत्पत्तिवाक्ये च आग्नेया
दयो न्योन्यनिरपेक्षा एवावगता इति तथा च ते संबध्यमाना दर्शादयो निरपेक्षा एव
मवतिष्ठंत इति॥ निरपेक्षोत्पन्ना अपि दर्शादिविधिश्रुतपौर्णमास्यादिनामाहृतैस्त्रयाणां सहैवा
वगता इति साहित्येनैव फलसंबंधः कस्मान्न भवतीति चेत्तन। विषमउपन्यासः॥ फले
प्रतिगुणकृतानां युक्तत्वेनाभिधानादवगतसाहित्यविवक्षा दर्शादौ स्तु प्रतिकर्मणीर्त्या
ग्यान्पाद विवक्षितं साहित्यं। तस्माद्यथा यदुच्छ्रापशुनासोमेनवायजेत सोमावास्यायां
पौर्णमास्यां च यत्तस्मिन्नुवाके तत्र त्रिहिताति रुपाधिरिति। प्रत्येकमेव कालस्य संबंधम
त इति नैकस्यामेव पौर्णमास्यां सर्वकर्मणि तेन तथाग्नेयादीनि प्रत्येकमेव कालादीनां संबं
धादेकस्यां पौर्णमास्यामाग्नेयैकत्वात् परस्यामग्नीषोमीयमित्येवं षट्सु पर्वसु षट् यागाः

शास्त्र

१ कर्त्तव्याः॥ नचैवं फलवाक्यावगतसाहित्यबाधः॥ तत्र ह्येतावदवगतमेकमेव फलं सर्वैः
साध्यते न प्रत्येकं फलस्य पृथग्निष्पत्तिरिति न तस्य कालभेदाद्बाधः॥ यथापौर्णमासी
त्रिके अमावास्यात्रिके च द्वयोः पर्वणोर्निष्कृष्यमाणेऽपि न फलं प्रति साहित्यं बाध्यते तथा
प्येषामपि हि निष्कर्षे द्रष्टव्यं। यदा चैवमुत्पत्तिवाक्यशेषत्वं कालादीनां तदोत्पत्तिवाक्यप्रधा
नेष्टमात्रापेक्षित्वेनाङ्गानां विधानात्तन्मात्राणामेवामी कालादयो नाङ्गानां प्रधानदेशकाल
कर्तृत्वेन तानि कस्मैचित्कालान्तरादिष्वपि कर्त्तव्यानीति प्राप्ते विधीयते॥ ॥ भावनोत्पत्तिवेला
यां देशादिविधयो यदि तत एवं भवत्वेतदु फलवद्भावनाश्रयाः॥ यद्यपि भावनायैवाङ्गानां १
संबन्धो न परस्परं तथापि नोत्पत्तिवेलायामङ्गसंबन्धः॥ साहित्यमपि भाव्यमपेक्षते
तल्लुप्तं च फलवाक्ये। तेन फलवाक्यावरुद्धानामुत्पत्तिवाक्यानामङ्गसंबन्धः फलवा
क्यं फलं प्रति विवक्षितसाहित्यानीति विनियोगात्फलार्थानी युगपत्सर्वेषु कर्त्तव्यतावगतिः॥
यस्यां हि बुद्धावङ्गेतिकर्त्तव्यतायाः प्रतिष्ठते तस्यामेवासौ पौर्णमास्यादयो प्रयोगविध्येकवाक्यता हि॥

पि २

तेन सर्वेषु कर्त्तव्यतयोपस्थितेषु विकार्षितेष्वपौर्णमासी कालो विहित इति ये
वैकापौर्णमास्युपात्ता से वाग(?)वक्ष्यमाणविशेषत्वात्सर्वापत्तिर्भवति। तथा देवाकर्त्तारिष्या
तस्माच्चैत्रीं सौर्या इदानीं पुनः पृथक् पृथक् स्वफले विनियुक्तानी पृथगेव कर्त्तव्या
तावगमो नाना विधि विधेयत्वात्तेन नतेरन्यो न्यानपक्षेरव यद्दृष्टापस्तुने त्यादिका
लः संबंधस्तद् इति नास्ति तंत्रत्वं। यदि पुनः कश्चिच्चित्रा फलं सौर्य फलं च युगपदिच्छ
न्कर्मद्वयमपि सह चिकीर्षते किमसौ तंत्रेणो कस्मिन्नेव काले द्वयमपि प्रयुंजीत
नेति ब्रूमः। यदा हि विधिवेलायां साहित्येनावगतं तदानुष्ठानदशायामपि न लभ्ये
त। कारणे कस्मादेकेन विधिना यावंत्यंगप्रधानानि विधीयंते तंत्रद्धि सेधाः। एकेन तु
विधिना फलसहचोदितानामांगेयोपक्रमो [illegible] नैवोपसंहारस्यानां चाहवैः सेवैध्यमा
नादेवगादर्योर्न नानाकाले प्रत्वं कालादानीं तदौ गानां [illegible] वक्ष्यमाणविशेषतयाविधिवेलाया
तावञ्जिर्यावान्कालो व्या[illegible]पृयते तावत्यविदित पृः समस्तांगप्रधानप्रयोगः कर्त्तव्य इत्यवगमात्। सह प्रयोग ३
दीनाकार

शास्त्र

८

4

र्व त्यंर्
मेवसर्वसंबंधितयाऽवगतासीत्संभवेतातिविशेषः॥ यदा चैवं प्रयोगवाक्यशेषत्वे
कालादीनां तदंगानामपि तत्कालत्वं सिध्यतीति तथाहि। साध्यसाधनीत्रयायुक्ता
वगता भावना कथमिति भावमपेक्षते भावनागतश्च रूपविशेषइत्यभावः॥ प्र
ज्ञातरूपा च भावना कालादीनपेक्षते। तेन प्रकारापेक्षायां तत्प्रकारकत्वेनप्र
याजादिषु सामस्त्यरूपेण भावनारूपव्यापारे प्रयोगापरपर्याये वगते तच्छेषत्वे
न कालादयो विधीयंत इत्यंगानामपि त एवं देशादयो भवंति। द्रव्यदेवते पुनर्न साम
स्त्यप्रयोगसंबंधित्वेन विधीयेते अनपेक्षितत्वात्। अप्रयोगपत्वाच्च। न हि यन्त्वाधान
वृहिस्तरणादेश्चतुरंगस्य प्रयोगस्य द्रव्यदेवतापेक्षा। नापि तन्नेषां तौ द्रव्यदेवते समर्थे ८
।व्रीह्युपफल भावनावयवयागरूपनिष्पादनेन द्रव्यदेवतमपेक्षितत्वात् प्रयोगपत्वाच्च
सीवध्यते। तस्मादप्रधानसंबंधि द्रव्यदेवतमंगानां भवति। कालादयस्त्वागतयादिकृ
रणक्रियाफलभावनया समग्ररूपया संबध्यमानास्तदंतर्गतानामंगानामपि भवंतीति

विशेषः॥ ८॥ इष्टिराजसूयचातुर्मास्येष्वैककर्म्याद्देशानीतितत्राव: स्यात्॥ ॥दर्शपूर्ण
मासयोर्भिन्नत्वपर्वद्वये प्रयुज्यमानयोरङ्गानि तेष्वतन्त्रप्रतिविक्रमावर्त्तेरन्निति संदेहे।
तन्त्रमित्याह। कस्मादेककर्मत्वात् षण्णामप्येकोपक्रमावसानत्वात्। तेनयुदेव वि
विदेशमनुष्ठितेति तदेवषस्थु विकृतिषु क्रियमाणमनुष्ठीयमाणविशेषत्वात्तन्त्रेण भवति।
वचनात्वेकोऽपिप्रयोगो विप्रकृष्टस्तेन तावतीनामङ्गानामावृत्तिः पश्चैवहृ यथापशु
प्रयोगेवपयाप्रातःसवनेवरन्तिपुरोडाशेन माध्यंदिनेऽङ्गे सन्तृतीयसवन इति वि
प्रकृष्यमाणेऽपिनीङ्गानामावृत्तिः तथेहापि इतिप्राप्ते ब्रूमः॥ त्रिकद्वयस्यासीत्यस्यवाद
नाकालयोर्द्वयोः। तेनाङ्गानामिहावृत्तिर्वपादीनां पञ्चौदनं॥ यद्यप्येकफलत्वादेकत्र
योयत्वेषपष्ठीप्राप्तीतथापिवावचनिकेन कालभेदेन प्रयोगभेदो भवति। पौर्णमास्यां पौर्णमा
स्यायजेतेत्यनेनहियः पौर्णमासीकरणकः फलार्थो व्यापारः प्रत्ययवाच्यः तदङ्गत्वेन पौर्णमासी
कालोविधीयते तेन पौर्णमासीयागमात्रेतेनीङ्गानामपि यागकरणफलक्रियान्तर्गतानीतकालता

श्रा विहिता भवति तथामावास्यायामपि सोमेवामावास्या विधीयत इति द्वयोः कालयोरंगानामा
वृत्तिः ॥ पशौ पुनर्वपाप्रचारादिमात्रस्य भिन्नकालचोदनान पशुयागस्यान प्रयप्रचारा
र्थान्यंगानि विहितानि। तेन तत्र नावर्त्तते। अत्र पुनः प्रधानकालभेदे नत्रंगानामावृत्तिः।
९ एवं चातुर्मास्ये राजसूयेवरुणप्रघासे ॥ ॥ तथा सपादध्वरक [illegible] त्यायां विशेषस्यैककालत्वात् ॥
प्रस्यध्वरकल्पानामेष्टिः आग्नावैष्णवमष्टाकपालं निर्वपेत्पूर्वाह्णे। सरस्वतीमाज्यस्यय
जेत बार्हस्पत्यंश्चस आग्नावैष्णवमेकादशाकपालं निर्वपेन्मध्यंदिने। सरस्वतीमाज्यस्य ९
यजेत वार्हस्पत्यश्चरु ॥ आग्नावैष्णवं द्वादशाकपालं निर्वपेदपराह्णे। सरस्वतीमाज्यस्ययजे
त बार्हस्पत्यश्चरुरिति। तत्र श्रूयते पुरा वाचः प्रवदितोर्निर्वपेदिति। तत्र किमंगानि तेत्रे
नु तत्रयाणामपि त्रिकानामर्थेन त्रिरंगान्यावर्त्तनीयानीति तदर्थमिदं विचिन्त्यते पुरा वाचः प्रव
दितोर्निर्वपेदिति। किं सर्वनिर्वापस्यापकर्षः उत प्रातःकालिकस्यैवेति प्रकरणविशेषात्सर्वनि
र्वापापकर्षः ॥ ततश्च तदादिवाजिसंबंधस्यादिति न्यायान्निर्वापीतस्या स्यान्याधानादेरंगकौडस्याप

रात्रौ सुप्त ... रात्प्राचीनेऽपः कालेऽपकर्षो लिखितः ४

कर

कर्षः॥ तद्योगकौऽर्थवचनादन्यकालमेवप्रधानानामुपकारकमिति गृह्यमाणविशेष
त्वात्तत्रप्रतस्थनवाप्पियागास्तौत्रेलोपक्रीतानवंतीति यथोपक्रमेव समापनमिति तु
तेरषामप्येगानीति वत्व्यो। स्यादेवं यदि निर्वापः सर्वेषामपकृष्यते। प्रातःकालिकमा
त्रस्यतद्विशेषोत्रचोद्यते। प्रातःकालविशेषोऽर्थे पुरावाबद्धत्ति विधीयते। तेनयस्य
सामान्यतः प्राप्तिस्तस्यैवायं विधीयते नान्यकालस्य। प्रधानकालत्वैवैव मेगानां
चोदकप्राप्ते नवाधितेभवति। तस्मान्मध्यंदिनापराह्णकालानां यागानामंगकौड्
नापकृष्यतइति नक्तवेषीसहोपक्रमः॥ तस्मात्प्रातर्मध्यंदिनापराह्णवर्त्तिनी प्रधा
नानामंगानाप्पितत्रतत्रावर्त्तेनायोनातितेत्रस्तेदः॥ ॥ वसाहोमस्तोत्रमेकदेवतोद्
स्यास्वाहानस्यैककालत्वात्॥ ७॥ अग्नीषोमीयेपशौ याज्याद्यैः त्रि वसाहोमंजुहो
तीति श्रुतौ वसाहोमश्चोदकप्राप्तः प्राजापत्येषु पशुषु प्राप्तस्तौत्रमावापोवेति से

शास्त्र ९०

स्पार्द्धा

देहे। सहस्रपएा द्दू साया एकत्वादेकदेवतत्वाच्च याँर्वोन्न सवेकत्वा तत्र सहत्वकृती
व्याद्द तिस्य सृष्टमेव विशिष्य हितार्थमुक्तं। कालभेदा त्वादृत्ति र्द्दैवता भेदा। तन्नाद्दे
वते यद्यपि पशुपुरोडाश पएा अर्चूणेन वसाया एकत्वा याज्यानुवाक्यां तदेपिय
स्यकस्य विघा ऽपार्द्धर्वा तेसहत्वदेवसा होमः स्यात्। नैवी। सर्वे। हिपशावः स्वयाज्या
द्दर्वोन्ते स्वस्या वसायाहोमे न प्रातिपत्तिमपेहते। नवति यवसा इव्येन स्तर्वेषु याज्या
र्द्दर्वान्नेषु तेदनवसाहोमः सर्वपशुवसाप्रतिपत्तये कर्तव्यः॥ ॥ अत्रैकयूपाइतिसाध्ये॥
अग्नीषोमीयपुरोडाशपशौ तिकअग्निमपित्वाऽन्यपाकुतिञ्जुहोति। तेयूपाकुतिर्यूपे
कादशिन्यां तदेन कर्तव्याप्रतिरेणावेतिसदेहे। तदेति कदेशानी नेदोद्दसाहोमव
दावृत्तिः। नैवैं॥ आपेक्षिके छी तिकदेशो मयनेसं नवति। तेनयद्द शोप्राग्नाक्षपसमी
पेप्राग्नास्मात्तिमन्यते यत्रयूपाद्द हि पपमापद्यते तत्रमयनीहोमस्य। सयसर्वेषा
मेकदेशः सं नवतीत्य गृह्यमाणाविशेषत्वात् तैत्रे॥ ॥ अवदान पशुप्रधाने तिविकारः स्याद

वरुणप्रघासेषु आग्नेयादीनि हवींषि विहितानि तेषु मारुतीमामिक्षां प्रतिप्रस्थाता दक्षिणविहारे इति श्रुतिरितराणि हवींष्य
ध्वर्युरुत्तरविहारे हवींषि ~~[illegible]~~ कृते सति

हितद्रव्येऽनुरक्तिसंयोगः॥ अथ एवंरूपेण वर्तितेति किं प्रधानमात्रमप्युत कर्तव्यो
नु तांगान्यपीति संशये मुख्याधौर्वांगस्यावोदितत्वादितिनेन न्यायेन वैकृतविको
षाणी केवलं प्रधानार्थत्वादुपोषुवद्दापो पि प्रधानस्यैवो अंगानीत्याहवनीय एव
क्रियतेति प्राप्ते ब्रूमः। तादुपोषुकर्तव्यादिति प्रधानक्रियायां विहितमुपोषुत्वेयु
तैर्यद्वेन [illegible] पुनर्नेवति। देशस्त्वेवरूपकरणिकायां क्रियायां श्रूयमाणत्वादेतगंता
नामंगानां तत्प्रवृत्तितस्मादंगप्रधानानामेकदेशत्वं॥ दक्षिणेत्वो वरुणप्रघासे
ष्वुदवसानेदा सर्वं तंत्रं विक्रियेत॥ वरुणप्रघासेषु विहारद्वयं द्वयोराहवनीया
विभज्य स्थापितः॥ तत्र श्रूयते अध्वर्युरुत्तरविहारे हवींष्यासादयति मारुती
मेव प्रतिप्रस्थाता दक्षिणास्मिन्निति। तत्र विचार्यते। किं तवानामपि हविषां तंत्रमं
गानुतान्ये यादीनाम [illegible] छानीमारुत्याश्चामिक्षायान्ते देनीगानि कर्तव्यानीति। तत्र प्राप्ते

ग्रा.स्त्र त्रिवरूणप्रघासैर्यतेति प्रयोगवचनैकत्वात्तैत्र त्वी॥ नचैदैवा नेदाङ्केदः॥ स्रासादनमात्र
११ हिदक्षिणे विहारे माकृत्वा विधीयते नहोमस्तस्मात्प्रधानदेशात्तेदात्तैत्रमेगानि॥ लेच॥
नच्चत्रासादनमपूर्वं विधीयते किंतुनवानामपि हविषो वादकस्याद्य मासादनं होमप्र
विहारद्वये प्यव्यवस्था यापाग्राहामुत्तरपूर्वाहवनीयस्य स्थापितत्वादासादनं नियम्यतेवा
वाद्दूयेनयपाग्राहास्यैवनियमः॥ प्राप्तिप्च होमार्पितयेनिताद्दृचा स्येवदक्षिणे विहारवि
धानाद्धोमापि दक्षिणास्मिन्नेव माकृत्वा तस्मात्प्रधानदेशान्तेदात्तृगृह्यमाणविशेषा
णां गानि नतैत्रैतत्वैति सत्यैनतैत्रमेगानिदेशान्तेदात्तथापितु नष्टप्रकृस्योनुष्ठानेप्रसंगा २० ११
कार्यसिद्धितः नन्तु करिष्यदेशान्तेदेकृष्णप्रसंगाः वक्तव्यस्योत्तरे स्पर्शस्याविहृतत्वाद्विनित
दिहाणपर्योविहृतःतथाहि सर्वाण्णितावदंगानिप्रधानानि वाध्वर्युकर्तृकाण्यपि तिप्र
स्थातृकर्तृकाणि वान्तरवैहारिकाणि [illegible] गानि वाध्वर्युकर्तृकाणि दक्षिणवैहारिका
णि च प्रजमानातमन्येवस्थापूर्वाणपाद्यचितितस्थात्वैहारिकप्रधानो दृक्षोनान्तराणि
२२

नु विहारे ध्वर्युणा कृते रीतौ यजमानानां निष्कासपूर्वं स्थापिते ऽपि तदेकार्थसमवायलब्धसाम
र्थ्यात् कृत्स्नं मारुत्या यागान्यत्वपूर्वं दक्षिणावेहारिकामपि प्रतिप्रस्थातृकर्तृकमपि स्वकार्यं तं
नतीति कृतमस्य स्वांगैः पृथगनुष्ठीयते ॥ अत्रावान्तरे त्रे । न्यस्य समारब्धे यत्रान्यस्य विधि
क्रतः । तत्र प्रसंगेनानत्र युगपत्सर्वं वोदनात् । यत्र प्रधाने वाद्यमानेन्यान्यंगानि प्रक्रान्ता
परिसमाप्तान्यालोच्यान्ते तत्र लाघवात्प्रयोगविधिरेव गुणकालाद्यन्यथा नावं कार्यप्र
रतया अनादृत्य अन्यदीयमेव तत्र मुपजीव्य न स्वीयं तन्त्रं प्रयुज्यते । इह तु नने वानामपि यागा
नी युगपच्चोदनात् युगपदुपक्रमावसाने वा तेन सर्वं पि तेन्यान्यानपेक्षाः स्वांगान्यात्मस
मानदेशकालकर्तृकाणि प्रयुंजते । तेन मारुत्याः स्वांगेषु दक्षिणे विहारे प्रतिप्रस्थात्राक्र
तेष्वानीतिगम्यमानेषु कथं तदनादरेणान्योपजीवनं । तदुपजीवने हि यदस्य स्वांगैः
समानदेशकर्तृकत्वं वोधनावगतं तल्लोपे वैगुण्यापत्तिः स्यादामिद्धायागो न फलायालं तस्मा
दुक्तं यत्रांगानामावृत्तिः ॥ ॥ कर्तृभेदस्तु पतिवेद्य ॥ ॥ कर्तृ चिदानीं तत्रावापो विदयते । तत्राध्व

चातुर्मास्यानां प्रसंकृत्ना पंच ऋत्विं ... लिंग वचने न विहारगतानां प्र धर्मेषु प्राप्त प्रस्थातृ होत्र प्रस्थान ... धामा पंचानां विहि ... नत्वा तत्र न्यायाद् शल्य माध्यन्दि
ननु पंचसंख्या ॥ तिप्रधर्मश्चाग्ने यो पधृत्मे प्रतिप्रस्थाता नाग्रान्यात्रमारुत्सा वरुणप्रघासेषु आग्नुपाद्स तत्त्वाहवचना देवेति वचनं अस्याध्वर्यु प्रतिप्रस्थातारौ ॥ ५

शास्त्र ९२

युप्रतिप्रस्थातारौ वचनाद्देव विहारद्वये व्यवस्थितौ ब्रह्महोताग्नीध्रश्च द्वि विहारयो
र्न दैनातन्त्रमिति तत्र देवाद्भेदेन प्रयोगभेदात् प्रयोगैगकृतानां कर्तृणामपि भेदः स्यात् ।
नैवं । अस्त्वपिभेदे नैवं । न यत्रापि कार्यसिद्धं दर्शितावत्कार्यसिद्धिर्नाथ्यैवंवचनाच्च चातुर्मा
स्यानां पंचर्त्विज इति । विहारद्वयात्प्रायो हा दृष्टेन विकृतवचनं । न चैकस्मिन् विहारे पंच
पंच सन्ति । वचनादेवाध्वर्युप्रतिप्रस्थात्रो विहारद्वये व्यवस्थितत्वात् । तस्मात् तत्र ब्रह्मादयः ॥ १२
एकाग्नित्वादपरेषु तन्त्रं स्यात् ॥ ॥ पशुनेष्टाग्निकाः पत्नीसंयाजादयः ते तु तन्त्रमावापवेला
स्त्वेदृष्टे । पौर्वाह्णिकवद्दृष्टभेदाभावात् तन्त्रत्वे । अस्त्वपि देशभेदे कर्तृभेदाद्भेदः ॥ प्रतिप्रस्था
ट्कृतो हि मारुत्यान्तु पशुर्वेति । अध्वर्युकृता स्वितरेषां तस्माद्भेदः ॥ ॥ पर्यग्निकृतानामुत्स
र्गं प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत्तस्माद् ब्रह्मसाम्नि चोदनादपपन्नं स्यात् ॥ ॥
वाजपेये प्राजापत्यान्पशून् पर्यग्निकृतानुत्सृजन्ति ॥ तान्पर्यग्निकृतानुत्सृजति ब्रह्मसाम्न्यालभन्त इति ॥

गार्हपत्यः

आहवनीयवत्

12

ग्नि ४

किमुत्सृजतीति कर्मणो य प्रतिषेध आलभनत इति वर्मान्तरविधिं तु नोत्सृजतीत्यनुवादः
आलभनत इत्युक्ते पर्यविधि॥ तत्र तात्पर्यमिति नतानारण्यानुत्सृजतीति वचनेदं तां गरीति विधाना
न्तरेव प्राज्ञापत्यानीनेराकोद्यान्तचो दके नीमीतरग्रह णीअत; पर्याग्निकरणानतः प्राजापत्या
ब्रह्मसाम्न्यालभनतइत्याउंचनश्चोषमिति वकर्मान्तरमिति मन्वानस्यो न्तरे नान्य कर्मविधियु
क्तो ऽनेकादृष्टप्रकल्पनात्। वाक्यभेद प्रसंगाञ्च तस्मादुक्त पर्यचोदना पर्यग्निकरणानंतरं प्रा
प्तस्यालंभस्य ब्रह्मसामकालत्वकर्ममात्रं विधीयते तद्धि धोवप्राप्तः पर्यग्निकरणीतेव्यापा
रो मरमाद्दृतितदनुवादमात्रमुत्सृजतीति एवमत्यन्तलाघवलाभान्न कर्मान्तरवाक्यभेदाभ्यु
पगमो युक्तः॥ तस्मात्पर्यग्निकरणांतमेगकोऽदं सक्षदेवकर्त्तव्यं न माध्यंदिने पुनरावर्त्तनीयं
पुनरावश्यं नान्यरुपादातव्या॥ ॥पैवस्यारदीयास्तपेतिबेदा॥ ॥आस्ति पैवस्यारदीयो नामाहीनः
पैवाहः। तत्र श्रूयते॥ वैशाख्याममावास्यायां सद्यदक्षामाकृती। त्रिवत्सा अप्रवीताउपाकरोतीत्स
प्तदशा पत्नीनुद्धत्स्तान्सम्प्राप्तिकृत्वा न्यं हिता नितराह्याल्मनीते प्रेतरानुत्सृजीतितत: सेवत्रा

त्रिप: गावरवेति केचित् अप्रसूताः २

अन्य शारीरा: १

रज्ञी नमतां

वो१

स्त्रा स्त्र रयांजावाऽपानयंति तीर्थ्यैः हृत्स्वा त्वान्पर्यग्निकृता नित्यादि पूर्ववदेवकृता येषु उपर्येव स्त्रीवरुण
रेस्त्री पशुयागानीत्यासमस्तोनानुष्ठानमुत्सर्गवपर्यग्निकृतानामुत्सर्गमुक्त्वा तत्र श्रूयते॥
एवमेव वर्षेद्वाविंशत एतान् हृत्स्वा स्त्री स्त्वानन्येहमालभन्ते पूर्वोत्तमेऽहनीति तत्र संस्थासु सेत्या
१२ यदाः॥ कितत्र प्रथमे संवत्सरे पर्यग्निकृता उत्सर्गास्तत्र दृष्टव्याः तेषामेव द्वितीयादिषु संव श्र: दि
त्सरेषु पर्यग्निकरणे एवमेव वत्सरे तेषामेव पर्वसु सुत्यासु त्री स्त्री नित्यैवमालभन्ते प्राजा
पत्यानामिव। नतत्र प्रथमेव वर्षेऽपक्रीतानां पर्यग्निकरणं तो गरीति विधानेन तत्रैव समाप्ति १२
रारएपवत्॥ द्वितीयादिष्वन्येष्वब्देषु एवमेव वर्षे सुत्यास्त्वन्येषामुत्सर्गो लभ्यते इति तत्र त्री
स्त्री नित्यनेन ब्रह्मसामालभन्ते वाक्यवत्तेषामेवालम्भोत्कर्षमात्र विधौ लाघवं। वचनात्प
र्यग्निकृतानामपि तेषां पुनः पर्यग्निकरणं क्रियते तु रूपैवं वचनालम्भोत्कर्षादेव प्राप्तस्यार्थ
स्यानुवादः इति प्राप्ते ब्रूमः॥ स्यादेवं यदि त्री स्त्री नित्यानेनालम्भोत्कर्षः शक्यो विधातुं न त्वेव
मस्ति गुणवाक्यत्वे सति त्री स्त्री नन्यहमिति वाने कार्थविधानेवाक्यभेदात्। तथा पंचेति रो

गर्द निवार

त्तमेहनीतिवार्थत्वेदोदर्शयितव्यः तस्मादिष्टितावत्संख्याकालविशिष्टापूर्वकर्मविधानं॥
एवंवाविहितेसत्यग्नीनोकर्षेप्रजापत्यन्यायासेनवाहृदंगरीति विधानेनाऽऽएणन्यायेनप्र
थमवर्षेपिक्रीतानामुत्कृष्यागानांत्रिवत्पानामिवतत्रैवसमाप्तिः॥ द्वितीयादिष्वपिवर्षे
षुअग्नेयएवस्वोपसद्यायागाः उपसद्यायागाश्चएवंप्रतिसंवत्सरीदेवतानुकर्षेणएवउक्त्वि
राहुकर्माणिपैवमेवान्येषामवोत्सामालीनः॥ ॥दशपेयेक्रयप्रतिकर्षाप्रतिकर्षः प्रा
वीतस्मात्समानंतत्रंस्यात्॥ राजसूयेत्विषेचनयोनामसोमयागः॥ ततःसंसृयया संसृपाख्यां
हवींषिततःपुनर्दशपेयःसोमयागः। तावितावत्त्विषेचनीयदशपेयौसमानतंत्रौ दशहव्यः
भिन्नतंत्रौवेतिसंदेहेसहसामेक्रीयाणान्यभिषेचनीयस्यदशपेयस्यवेतिविवचनादभि
षेचनीयसोमक्रयकालेदशपेयक्रमयः प्रतिकृष्यते। सर्वत्रप्रतिकृष्यमाणः प्राचो
पिपदार्थान्प्रतिकर्षतितदत्तमयकर्षस्यादितिन्यायात्। तस्मात्सहोपक्रमितव्यावत्ति

षेवमीयदर्शपेयोय योपक्रमेव समापयितव्याविति समानतंत्रौ॥ ॥ नेवैतदुपपद्यवाद मात्रम
रागाख्य त्रहि क्राणातिनोच्यते न त्वंगभूतः क्रयः॥ ननु सो क्राणातेर्न मुख्यो वाच्यः मूलं दल
१४ परक्रीयस्पस्वीकरणे क्रयः॥ नवोपसीवादस्ये वैरूपत्यमस्ति॥ यद्यप्येवं तथापि जो
णपाहृत्यात सोवेदस्ताहितमुच्यते॥ ववनीतराननुगुणाद्॥ दर्शपेये हि श्रूयते सद्यो
दीक्षयति सद्यः सोमं क्रीणातीति तथाप्रति षेवनीयेऽप्यवरूपं दर्शनमत्यंतानुपपन्न
मेकतंत्रत्वे स्यात्॥ तस्माद्दीगभूतक्रयापकर्षाभावान्न तदंतापकर्ष इति न सहोपक्र
मत्वे कालान्तेदाद्धुत्तिनो पक्रमावसानौ॥ निरन्तते त्रावेतौ॥ ८॥ निकामस्यावरुद्धे १४
तदेकदेशलोपान्नवरुद्धदानविप्रकर्षः स्यात्॥ वरुणप्रघासेषु वारुणमिक्षामा
त्पामिक्षेति श्रुतौ॥ तत्र पुनः श्रूयते॥ वारुणानिक्षासे ननु पेक्षावरुद्धौ पर्यंतोति तत्र संत्रा
यः॥ किं प्रधानस्यामिक्षापागस्यायं प्रवारविप्रकर्षः॥ पत्रो रिवव पा हृदयादि॥ नि. प्रातस

वनतृतीयसवनयोरुत निर्वापस्यैवप्रतिपत्तिः। अथामिक्षानिष्कासद्रव्यकमवभृथधर्म्मकं वै
कर्म्मांतरं विधीयतइति तत्राह। स्यामिक्षाद्रव्यस्यप्रकृतयागशेषत्वात्तदेकदेशोतस्याप
वदेवतायैवरुणायदीयमानेनकर्म्मांतरं युक्तमवभृथशब्दस्तुदेवतासामान्याद्गौणो
नुवादः॥ अवभृथोपि हि वारुणः। नचानुवादेगौणत्वेदोषः सिद्धीत्तेतु तद्धर्म्मकर्म्मविधौ
विधावेवगौणत्वंस्यात्तच्चायुक्तं तस्मात्तस्यैवायमन्यास इति न स्यु चक्रादादेः पुनः क
रणे। नैवं। अवभृथशब्दानर्थक्यात् नचार्थवत्त्वेसत्यानर्थक्यं युक्तं तस्मादवभृ
थधर्म्मकं कर्म्मान्तरविधानं तत्र प्रयाजशेषाभिघारणवदामिक्षाशेषस्यप्रतिपत्त्यर्थत्वेसत्येक
र्म्मान्तरं न तु प्रतिपत्तिः अवभृथशब्दविरोधात्। अवभृथे हि द्रव्यवैगुण्यात् कर्म्मप्रधानतः
इह तु विपर्ययात्तच्चानुपपत्तिः ते न यस्यैवावभृथशब्दस्य प्रसादात् कर्म्मान्तरमाश्रितं
तेनैव प्रतिपत्त्यर्थतानिराकरणे नार्थकर्मतासिध्यति वचनाच्चान्यदीयस्यापि द्रव्यस्यैकदेशो
न्यत्र विनियुज्यमानो न दुष्यति ॥ ८ ॥ उदयनीयेवत्सद्वत् ॥ ८ ॥ ज्योतिष्टोमे प्रायणीयश्चरुरुदयनी

यश्च तत्र श्रूयते प्रायणीयस्य निर्वापस्तदुदयनीयमनु निर्वपतीति तत्र संशयः किं प्रायणीयनि
र्वापसद्भावकमुदयनीयधर्मकं कर्मान्तरं विधीयते किं वा प्रायणीयनिर्वापस्योदयनीयनि
र्वापसंयोगः प्रतिपत्तिरूपः प्रायणीयनिर्वापे निर्वापमुदयनीयस्य संस्कार इति पूर्ववत्तद्धर्मक
कर्मविधिः मुख्यस्यैव तदुदयनीयस्यापि हविष्ट्वात्प्रकरणान्तरन्यायेन तद्धर्मकं कर्मवि
धिः॥ तस्मात्प्रायणीयनिर्वापस्य कृतार्थस्य तत्प्रतिपत्तिः उदयनीयनिर्वापसंयोगः नैत
देवं॥ निर्वापस्य हि संस्कार्यगुणताऽवगम्यते द्वितीयया प्राधान्यमितरस्य स्फुटं श्रू
तेः॥ उदयनीयहविश्च निरूप्यमाणो नानुपयोगित्वात् सुतरां संस्कारार्हं न चैव निर्वा
पस्य प्रयाजशेषवदुदयनीयसंयोगात् किंचिद्दृष्टमस्तीति तस्माद्दृष्टानुगुणत्वादुदयनीयह
विः संस्कारार्थं प्रायणीयनिर्वापे निर्वापः॥ ६॥ इति शास्त्रदीपिकायामेकादशस्य द्वितीयः
पादः॥ ॥ अङ्गानां मुख्यकालत्वाद्भवनादन्यकालत्वं॥ प्रधानसमदेशत्वं प्रधानकालत्वे गौणा
मुख्यं यत्र त्वाहत्य गौणस्य भिन्नदेशकालत्वं वचनेनैवोक्तं तत्र तथा भवतीति इह तु हेतुत्वोक्त्वान्तात्र १५

निराकार्यमस्ति॥ ॥द्रव्यस्याकर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात् । स्वकालत्वात्॥ ८१॥ व
सीते ब्राह्मणो ग्नीनादधीत॥ नारम्याधीतमप्याधानमस्ति होत्रादीनामेग मितिहासत्वादित्यते
किमेगे सदाधाने प्रतिकर्म प्रतिप्रयोगीन्ते दे न कर्तव्यमुत सर्वकर्मणां सकृत्प्रयोगा णीव तत्रैतोतितत्व
प्रयाजादिवदेकगत्वा दावृत्तिः स्यात् प्रतिक्रियं। आनंतर्याद्विशेषश्चागृह्यते ऽतानती
वता । स्वकालत्वाद्वतैत्रलैविशेषाग्रहणाद्ववेहा। आनंतर्याद्विशेषश्चेन्नाधानस
मये स्यात्सो॥ नहीदं कर्मणां प्रारंभे मध्ये वा प्रयुज्यते। येन तदर्पकरं प्रपद्य ऽपेतवास्व नि
कोह्यस्पवसीतादिं स्वकालेन नत्रैवाश्रित्य तैः सर्वेषामुपकरोतीत्यगृह्यमाणविशे
षत्वात्तत्र। यदाधाने हृते ऽनंतरं किं चित्कर्म प्राप्नुयात्तदर्थमित्यानंतर्येणाविशेषो
ऽपेक्ष्यत इति वेहा। नायमाधानसमये क्रियाविशेषः तदा त्वेवमसिसैधायासावाधत्तेय
देव किं चिन्निमित्तवशात् कामवशाद्वा कर्तव्ये कर्मोपस्थास्यतेतदर्थमाधास्ये ऽग्नीनि

अथ पशव सवनीया अग्नीषोमीपसवनीयानुबंध्याः विहिताः ४

अय ६

आस्त्र तिनन्छ विविदव कर्म्मविशेषमनिसंधायायत्तो। एवमनन्तिसंहितकर्मविशेषेण सर्वो
दृष्टोनाधाने कृते यद्यपि किंचित्कारणवशात्प्रथमं कर्म पतति तथापि न तादर्थ्यमवहन्त
१६ वेति प्रथमावस्थायामेवसर्वार्थत्वावधारणात्तस्मात्तेत्रे॥ ॥ यूपश्चाकर्मकालत्वात्॥
येतिष्टोमे अग्नीषोमीयपशोर्यूपदिष्टो यूपः सवनीयानुबंध्ययोस्त्वतिदिष्टः। सकिं
त्रयाणामपि पशूनीतीत्रेतत्प्रतिपन्नु सत्रन्नेदनयूपद्गतितदर्थमि दं विचार्यते। दी
16 सुयूपश्छिन्नतीति किमग्नीषोमीययूपस्यापकर्षेणोत सर्वेषु पानामिति तत्पैवाद्यो
र कल्यायामाद्यस्यैवापकर्षणोनिर्वीपसर्ततथापरे प्याद्यएवापकृष्यते॥ अग्नीषो
मीयसंस्थायामतोस्मावपकृष्यते। नेदेन सवनीयादौस्यकाले यूपसंग्रहः॥ ॥ नेतदस्य
विशेषेण सर्वेषु पापकर्षेण हाने वेहोधरकल्पावद्युक्त माद्यापकर्षणी। प्रधानस्य कालं
[illegible] बाधो ततयेवा प्राप्तावादना॥ आद्यापकर्षेण प्रसक्ति। तस्मात्सर्वापकर्षणी॥
अथ्युक्तायाहि प्रथमनिर्वाणापकर्षसति प्रधानकालवाधो नियमविधानेवलभ्यतइति १६
२२

तस्यैवापकर्षः समाश्रितः ॥ अत्र त्वग्नीषोमीयपशुपुरोडाशापकर्षेप्यस्ति प्रधानकालबाधो प्राप्त
विशिष्यते तस्मादविशेषात् सर्वे यूपाः प्रकर्षसत्यकर्मकालत्वादग्रहणविशेषो यूपः सर्वेषां
तेत्र ॥ ॥ संस्कारास्त्वावर्त्तेरन्तर्थकालत्वात् ॥ ॥ यूपस्य तेत्र तत्संस्काराणीति हरणजो
षणप्रोक्षणादानीत्वेत्वं [illegible] मा प्रवृत्तिसंदेहे छेदनमात्रस्यापकर्षविधानात्तक्षणादीनां
वाग्नीषोमीयकालानीतदपवर्गं पवर्गां अवनायादौ पुनः प्रयोग इति प्राप्तेऽब्रूमः तेषाम
प्यपकर्षः ॥ दारुरूपयूपं छिनत्तीति नायमर्थः ॥ यूपं संतीक्ष्णं छिनत्तीति यूपस्य प्रागसिद्धत्वादु
क्तिर्हि छेदनेन यूपं कुर्यादिति नवच्छेदनमात्रेण सोकर्तुं शक्यते तक्षणादीनामपि यूपत्वप्र
दितत्वात् तस्मात् छेदनग्रहणमुपलक्षणं छेदनादिति यूपं कुर्यात् तस्मात्तेषामप्यपक
